## ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। (५९/३७३)

[1]ऋत्विगादयः पञ्चशब्दाः क्विन्प्रत्ययान्ताः निपात्यन्ते, [2]अपरे त्रयो धातवो निर्दिश्यन्ते। ऋतुशब्द उपपदे यजेर्धातोः क्विन् प्रत्ययो [3]निपात्यते। ऋतौ यजति, ऋतुं वा यजति, ऋतुप्रयुक्तो वा यजति[4] ऋत्विक्। रूढिरेषा यथाकथंचिद[5]नुगन्तव्या। धृषेः [6]क्विन् प्रत्ययः, द्विर्वचनम्, अन्तोदात्तत्वं च [7]निपात्यते। [8]धृष्णोति इति दधृक्। [9]सृजेः कर्मणि क्विन्, अमागमः च [10]निपात्यते। [11]सृजन्ति ताम् इति स्रक्। दिशेः कर्मणि [12]क्विन् निपात्यते। [13]दिशन्ति ताम् इति दिक्। [14]उत्पूर्वात् स्निहेः [15]क्विन्, उपसर्गान्तिलोपः, षत्वं च निपात्यते। उष्णिक्। अञ्चु युजि क्रुञ्च इत्येतेषां [16]धातूनां क्विन् प्रत्ययो भवति। निपातनैः सह निर्देशात् अत्रापि किंचिदलाक्षणिकं[17]कार्यमस्ति। अञ्चतेः सुबन्तमात्र [18]उपपदे [19]क्विन् प्रत्ययो [20]भवति। प्राङ्। प्रत्यङ्। [21]उदङ्। युजेः क्रुञ्चेश्च केवलादेव[22]। युङ्, युञ्जौ, युञ्जः। सोपपदात् तु 'सत्सूद्विष°' (३.२.६१/२९७५) इत्यादिना [23]क्विप् भवति। अश्वयुक्, [24]अश्वयुजौ, अश्वयुजः। क्रुङ्, क्रुञ्चौ, क्रुञ्चः। [25]नलोपः कस्मान् न भवति? [26]निपातनसाहचर्यात्॥

## त्यदादिषु दृशोऽनालोचने कञ् च। (६०/४२०)

[27]त्यदादिषु उपपदेषु दृशेर्धातोरनालोचने[28]ऽर्थे वर्तमानात् कञ् प्रत्ययो भवति, चकारात् क्विन् च। त्यादृशः, [29]त्यादृक्। तादृशः, तादृक्। यादृशः, यादृक्[30]। [31]कञो ञकारो विशेषणार्थः, [32]ठक् ठञ् कञ् (४.१.१५/४७०) इति। अनालोचने इति किम्? तं पश्यति [33]तद्दर्शः। [34]तादृगादयो हि रूढिशब्दप्रकाराः, नैवात्र दर्शनक्रिया विद्यते।

[२६१] [35]समानान्ययोश्चेति वक्तव्यम्। (म. भा. २.१०७)

सदृशः, सदृक्। अन्यादृशः, अन्यादृक्।

[२६२] [36]दृशेः क्सश्च वक्तव्यः। (म. भा. २.१०७)

तादृक्षः। यादृक्षः। [37]अन्यादृक्षः। [38]कीदृक्षः[39]॥

---

1. ऋत्विगाद्याः ब. 2. परे तु ड. 3. भवति अ. ब. क. 4. इति इत्यधिकम् अ. 5. अवगन्तव्या ग. 6. क्विन् नास्ति फ, विवन्निर्वचनमन्तोदात्तत्वम् ह. 7. निपात्यते नास्ति अ. 8 धृष्णोति इति नास्ति ब. ह, इति नास्ति फ. 9. सृजेः नास्ति ब. 10. निपात्यते नास्ति फ. 11. सृजति फ. 12. क्विन्प्रत्ययः ब. क. ह. 13. दिशति फ. 14. उपूर्वात् ह. 15. क्विप् ह, क्विन् प्रत्ययः ब. 16. धातूनां नास्ति ब. 17. कार्यम् नास्ति क. ब. 18. उपपदे नास्ति ब. क. 19. क्विप्रत्ययो ह. 20. भवति नास्ति ब. 21. दध्यङ् ड. 22. एव नास्ति फ. 23. क्विबेव फ. ह. 24. अश्वयुजौ अश्वयुजः नास्ति क. 25. इह इत्यधिकम् अ. 26. निपातनैः सह निर्देशात् अ. ब. फ. ह. 27. त्यदादिषु उपपदेषु वर्तमानात् पश्चात् दृश्यते ह. 28. अर्थे नास्ति ह. 29. त्यादृक् नास्ति ब. फ. 30. सदृक् सदृशः। अन्यादृक् अन्यादृशः इत्यधिकम् क. 31. कञः नास्ति फ. कैञकारः ब. 32. ठक् नास्ति फ, ठक्–इति नास्ति ह. 33. तन्दर्शः ह. 34. तादृशादयः फ. 35. वार्तिकमिदं नास्ति ग. 36. दृशेश्च इति वक्तव्यम् फ, कश्च ह. 37. अन्यादृक्षः नास्ति ब. 38. ईदृक्षः क. 39. सदृक्षः इत्यधिकम् ह.